१५

उत्तररामचरितम् - चित्रदर्शनम् - २

प्रस्तावना

पूर्वस्मिन् पाठे अस्माभिः रामसीतालक्ष्मणाः विवाहात् परम् अयोध्यायां कथं स्थिताः इति आलोचितम्। विराधवृत्तान्तः मन्थरावृत्तान्तः गुहसाक्षात्कारः इत्यपि वयम् आलोचितवन्तः। अस्मिन् पाठे प्रथमतः सीता चित्रमध्ये रामलक्ष्मणयोः जटासंयमनवृत्तान्तं पश्यति। तदनु वनमार्गेण गमनकाले तैः यत् प्राकृतिकसौन्दर्यम् अवलोकितं तस्य चित्राणि ते पश्यन्ति। प्रसङ्गेऽस्मिन् भागीरथीनदी , श्यामनामकः वटवृक्षः, प्रस्रवणनामकः पर्वतः, विन्ध्यारण्यम् इत्येतेषां चित्रदर्शनम् अस्मिन् पाठे आलोचितम्।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- रामस्य सीतायाः च कांश्चन विशेषगुणान् ज्ञातुं शक्नुयात्।
- भागरथीं श्यामवृक्षं प्रस्रवणपर्वतं विन्ध्यारण्यं च जानीयात्।
- सीतारामयोः सुदृढं प्रेम जानीयात्।
- छन्दसां लक्षणानि अवगच्छेत्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।

१५.१) सम्पूर्णः मूलपाठः

सीता - **अह्मो एसो जडासंजमणवुत्तन्तो। (अहो एष जटासंयमनवृत्तान्तः।)**

लक्ष्मणः -

पुत्रसङ्क्रान्तलक्ष्मीकैर्यद् वृद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥२२॥

सीता - **एषा पषण्णपुण्णसलिला भअवदी भाईरही। (एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।)**

रामः - रघुकुलदेवते ! नमस्ते।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसा रोषात्प्लुष्टान् पितुश्च पितामहान्।
अगणिततनूतापस्तप्त्वा तपांसि भगीरथो
भगवति! तव स्पृष्टानद्भिश्चिरादुदतीतरत् ॥२३॥

सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव।

लक्ष्मणः - एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम।

(रामः सस्पृहमवलोकयति।)

सीता - सुमेरदि वा तं पदेसं अज्जउत्तो? (स्मरति वा तं प्रदेशमार्यपुत्रः?)

रामः - अयि कथं विस्मर्यते ?

अलसललितमुग्धान्यध्वसम्पातखेदा-
दशिथिलपरिम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।।२४।।

लक्ष्मणः - एष विन्ध्याटवीमुखे विराधसंवादः।

सीता - अलंदाव एदिणा। पेक्खम्मि दाव अज्जउत्तसहत्तधरिदतालबुन्तादवत्त-निवारिदादपं दक्खिणारण्णप्पवेशारम्भम्। (अलं तावदेतेन। पश्यामि तावदार्यपुत्रस्वहस्तधृततालवृन्तातपत्रनिवारितातपमात्मनो दक्षिणारण्यप्रवेशारम्भम्।)

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथेयपरमा यमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥२५॥

लक्ष्मणः - अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्ध-गोदावरीमुखरकन्दरः सन्ततमभिष्यन्दमानमेघमेदुरितनीलिमाजनस्थानमध्यगो गिरिः प्रस्रवणो नाम।

स्मरसि सुतनु तस्मिन्पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि।
स्मरसि सरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि।। २६।।

किं च,

किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्।। २७।।

लक्ष्मणः - एषा पञ्चवट्यां शूर्पणखा।

सीता - हा अज्जउत्त, एत्तिअं दे दंसणं। (हा आर्यपुत्र, एतावत् ते दर्शनम्।)

रामः - अयि विप्रयोगत्रस्ते, चित्रमेतत्।

सीता- जहा तहा होदु। दुज्जणो असुहं उप्पदेइ। (यथा तथा भवतु। दुर्जनः असुखमपुत्पादयति।)

रामः - हन्त, वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्मणः - अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।२८।।

१५.२) साम्प्रतं मूलपाठम् अवगच्छाम - २०

सीता - अह्मो एसो जडासंजमणवुत्तन्तो। (अहो एष जटासंयमनवृत्तान्तः।)

लक्ष्मणः - पुत्रसङ्क्रान्तलक्ष्मीकैर्यद् व्रुद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥२२॥

सीता - एषा पषण्णपुण्णसलिला भअवदी भाईरही। (एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।)

रामः - रघुकुलदेवते ! नमस्ते।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसा रोषात्प्लुष्टान् पितुश्च पितामहान्।
अगणिततनूतापस्तप्त्वा तपांसि भगीरथो
भगवति! तव स्पृष्टानद्भिश्चिरादुदतीतरत् ॥२३॥

सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव।

अन्वयः -

सीता - अहो एष जटासंयमनवृत्तान्तः।

लक्ष्मणः - पुत्रसङ्क्रान्तलक्ष्मीकैः वृद्धेक्ष्वाकुभिः यत् (व्रतं) धृतं तत्पुण्यम् आरण्यकव्रतम् आर्येण बाल्ये धृतम्॥२२॥

सीता - एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।

रामः - रघुकुलदेवते! नमस्ते।

हे भगवति, भगीरथः अगणिततनूतापः सन् तपांसि तप्त्वा तव अद्भिः स्पृष्टान् सगराध्वरे तुरगविचयव्यग्रान् उर्वीभिदः रोषाद् कपिलमहसा प्लुष्टान् च पितुः पितामहान् चिरात् उदतीतरत्॥२३॥

सा त्वम् अम्ब! स्नुषायां सीतायाम् अरुन्धती इव शिवानुध्याना भव।

अन्वयार्थः -

सीता - अहो आश्चर्यम् एषः अयं जटासंयमनवृत्तान्तः जटाबन्धनस्य वृत्तान्तः।

लक्ष्मणः - पुत्रसङ्क्रान्तलक्ष्मीकैः पुत्रान् आश्रिता लक्ष्मीः श्रीः येषां तैः वृद्धेक्ष्वाकुभिः वृद्धैः इक्ष्वाकुवंशोत्पन्नैः नृपैः यद् धृतं यद् आरण्यकव्रतं वानप्रस्थव्रतं गृहीतम् तत्पुण्यं पवित्रं वानप्रस्थव्रतम् आर्येण रामेण बाल्ये बाल्यकाले धृतम् अङ्गीकृतम्।॥२२॥

सीता - एषा इयं प्रसन्नपुण्यसलिला निर्मलपवित्रजलपूर्णा भगवती देवी भागीरथी गङ्गा।

रामः - रघुकुलदेवते भागीरथि नमः नमस्कारः तुभ्यम्।

हे भगवति देवि, भगीरथः अस्मत्पूर्वजः अगणिततनुतापः उपेक्षितदेहदुःखः सन् तपांसि तप्त्वा तपस्याः कृत्वा तव भवत्याः अद्भिः जलैः स्पृष्टान् आमृष्टान् सगराध्वरे सगरयज्ञे तुरगविचयव्यग्रान् तुरगस्य अश्वस्य विचये अन्वेषणे व्यग्रान् व्याकुलान् उर्वीभिदः पृथिवीविदारकान् रोषात् क्रोधात् कपिलमहसा कपिलमुनितेजसा प्लुष्टान् दग्धान् पितुः जनकस्य पितामहान् सगरात्मजान् चिराद् बहुसमयाद् अनन्तरम् उदतीतरत् उद्धारयामास॥२३॥

सा त्वं भवती अम्ब हे मातः, स्नुषायां वध्वां सीतायाम् अरुन्धती वसिष्ठपत्नी इव शिवानुध्याना मङ्गलचिन्तनपरा भव।

व्याख्यानम् -

सीता जटाबन्धनवृत्तान्तम् अपश्यत्। रामः लक्ष्मणः च शृङ्गवेरपुरे एव जटाबन्धनम् अकरोत्। अत्र लक्ष्मणः श्रीरामस्य व्रतपालनरूपेन गुणेन इक्ष्वाकुवंशीयेभ्यः नृपेभ्यः उत्कृष्टतां वर्णयति। इक्ष्वाकुवंशस्य राजानः सम्पूर्णं जीवनं व्याप्य राज्यसमृद्ध्यादिसुखम् अनुभवन्ति। यदा वार्धक्यकालः समापतति तदा ते राज्यस्य भारं पुत्रेभ्यः समर्प्य वानप्रस्थव्रतम् आश्रयन्ति। अर्थात् सर्वविधानि सुखानि लब्ध्वा ते अन्ते व्रतम् आश्रयन्ति। किन्तु श्रीरामः शैशवे एव एतद् दुष्करं व्रतं समाचरत्। व्रतपालनाय स वार्धक्यकालपर्यन्तम् अपेक्षां न अकरोत्। एवं श्रीरामः बाल्ये एव पवित्रं वानप्रस्थाश्रमम् आचरितवान्।

सीता चित्रे भागीरथीनदीं पश्यति यस्याः जलं निर्मलं पवित्रं च वर्तते। एषा च नदी रघुवंशस्य पूर्वजेन भगीरथेन तपसा स्वर्गतः पृथिवीलोकं प्रति आनीता। अतः सा भागीरथी रघुवंशस्य कुलदेवता अस्ति। अतः तां नदीं श्रीरामः नमस्करोति।

अत्र श्रीरामः गङ्गायाः स्वर्गलोकतः भूलोकागमनवृत्तान्तं वर्णयति। प्राचीनकाले सगरनामकः नृपः अश्वमेधनामकं यज्ञम् अकरोत्। अश्वमेधयज्ञे अश्वः एव प्रधानः भवति। तं च अश्वम् इन्द्र कपटताम् आश्रित्य अचोरयत् किञ्च गुप्तस्थाने अस्थापयत्। अश्वं विना यज्ञसमाप्तिः न भविष्यति। अतः सगरस्य षष्टिसहस्रं पुत्राः अश्वम् अनुसन्दधानाः पृथिवीं भिन्दन्ति स्म। तस्मिन् एव महर्षिः कपिलः केनचित् कारणेन कुपितः सन् तान् सर्वान् अपि पुत्रान् भस्मावशेषान् अकुर्वन्। भागीरथीजलस्पर्शेन एव ते पुत्राः उद्धारं प्राप्तुं समर्थाः। किन्तु भागीरथी तदा स्वर्गे आसन्। बहुकालात् परं सगरस्य प्रपौत्रः भगीरथः कठोरतपसा भागीरथीं भूलोकम् आनीय तस्याः जलेन षष्टिसहस्रपुत्राणाम् उद्धारं कृतवान्।

रामः भागीरथीम् अम्ब इति उक्त्वा सम्बोधयति किञ्च सीतायाः मङ्गलविधानाय प्रार्थयति।

विशेषटिप्पणी -

शिवानुध्याना भवेत्यत्र बीजार्थस्य प्ररोहत्वाद् उद्भेदनामकं सन्ध्यङ्गम्। तल्लक्षणं तावत् - "बीजार्थस्य प्ररोहः स्यादुद्भेदः" इति।

व्याकरणविमर्शः -

१. पुत्रसङ्क्रान्तलक्ष्मीकैः- पुत्रेषु सङ्क्रान्ता पुत्रसङ्क्रान्ता इति सप्तमीतत्पुरुषः। पुत्रसङ्क्रान्ता लक्ष्मीः येषां तैः इति बहुव्रीहिसमासः।

२. आरण्यकम् - अरण्ये भवा इत्यर्थे अरण्यशब्दाद् वुञ्प्रत्यये आरण्यकाः इति निष्पद्यते। आरण्यकानामिदम् इति विग्रहे आरण्यकशब्दाद् अणि आरण्यकम् इति रूपम्।

३. तुरगविचयव्यग्रान्- तुरेण गच्छतीति तुरगः। तस्य विचयः तुरगविचयः इति षष्ठीतत्पुरुषः। तस्मिन् व्यग्रान् तुरगविचयव्यग्रान् इति सप्तमीतत्पुरुषः।

४. उदतीतरत्– उत्पूर्वकात् तृधातोः णिचि लुङि उदतीतरत् इति रूपम्।

छन्दः - तुरगविचयव्यग्रान् इत्यस्मिन् श्लोके हरिणीच्छन्दः। तल्लक्षणं-
"रसयुगहयैर्न्सौम्रौस्लौ गौ यदा हरिणी तदा।" इति।

पाठगतप्रश्नाः - १

१. रामलक्ष्मणयोः जटाबन्धनं कुत्र सञ्जातम्।

२. इक्ष्वाकुवंशीयाः कदा वानप्रस्थाश्रमं पालयति।

३. भागीरथी कीदृशी वर्तते।

४. कः भागीरथीं स्वर्गतः मर्त्यलोकम् आनीतवान्।

५. सा सीतायां कीदृशी भवेदिति रामस्य प्रार्थना।

१५.३) साम्प्रतं मूलपाठम् अवगच्छाम - २१

लक्ष्मणः - एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम।

(रामः सस्पृहमवलोकयति।)

सीता - सुमेरदि वा तं पदेसं अज्जउत्तो? (स्मरति वा तं प्रदेशमार्यपुत्रः?)

रामः - अयि कथं विस्मर्यते ?

अलसललितमुग्धान्यध्वसम्पातखेदा-
दशिथिलपरिम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।।२४।।

अन्वयः -

लक्ष्मणः - एष भरद्वाजावेदितः चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे श्यामो नाम वटः।

(रामः सस्पृहम् अवलोकयति।)

सीता - आर्यपुत्र, तं प्रदेशं स्मरति वा?

रामः - अयि कथं विस्मर्यते ?

यत्र त्वम् अध्वसम्पातखेदात् अलसललितमुग्धानि अशिथिलपरिरम्भैः दत्तसंवाहनानि परिमृदितमृणालीदुर्बलानि अङ्गकानि मम उरसि कृत्वा निद्राम् अवाप्ता।।२४।।

अन्वयार्थः -

लक्ष्मणः - एषः अयं भरद्वाजावेदितः मुनिना भरद्वाजेन विज्ञापितः चित्रकूटयायिनि चित्रकूटपर्वताभिगामिनि वर्त्मनि मार्गे वनस्पतिः वृक्षः कालिन्दीतटे कालिन्दीनद्याः तीरे वटः श्यामो नाम श्यामनामकः वटवृक्षः।

(रामः सस्पृहम् सोत्कण्ठम् अवलोकयति पश्यति)

सीता - आर्यपुत्र, तं प्रदेशं स्थानं स्मरति वा।

रामः - अयि कथं केन प्रकारेण विस्मर्यते विस्मरामि।

यत्र यस्मिन् प्रदेशे त्वं सीता अध्वसम्पातखेदात् मार्गगमनपरिश्रमात् अलसललितमुग्धानि अलसानि आलस्ययुक्तानि ललितानि कोमलानि मुग्धानि सुन्दराणि अशिथिलपरिरम्भैः गाढालिङ्गनैः दत्तसंवाहनानि कृतमर्दनानि परिमृदितमृणालीदुर्बलानि परिमृदिताश्च ताः मृणाल्यः ता इव दुर्बलानि कृशानि अङ्गकानि शरीरावयवान् मम रामस्य उरसि वक्षःस्थले कृत्वा निधाय निद्रां स्वापम् अवाप्ता प्राप्ता।।२४।।

व्याख्यानम् -

वनवासकाले महर्षिः भरद्वाजः तेभ्यः चित्रकूटवनं प्रति गमनमार्गं ज्ञापितवान्। तस्मिन् गमनमार्गे यमुनानद्याः तीरे ते श्यामनामकं वटवृक्षं चित्रे पश्यति सीता। तदा सीता रामं - स्मरति वा एतं प्रदेशम् इति पृच्छति। तदा रामः वदति यत् तस्य प्रदेशस्य स्मरणम् असम्भवम्। ततः रामः अविस्मरणहेतुं कथयति - सीता मार्गपरिश्रमात् अतीव श्रान्ता आसीत्। सीतायाः अङ्गानि आलस्ययुक्तानि परिश्रान्तानि च आसन् किन्तु तानि तेषां सौन्दर्यं न अत्यजन्त। तां च श्रान्ताम् अवलोक्य श्रीरामः तां दृढतया आलिङ्गितवान्। तेन आलिङ्गनेन सीताया पद्मदण्डानि इव कोमलानि अङ्गानि विदलितानि। अतीव परिश्रान्ता सीता तदा रामस्य दृढालिङ्गनं प्राप्य तस्य वक्षस उपरि एव स्थित्वा स्वापं कृतवती। एवं रामसीतयोः मध्ये प्रेमप्राचुर्यं प्रस्तुतेन श्लोकेन वर्णयति कविः।

व्याकरणविमर्शः -

१. भरद्वाजावेदितः- भरद्वाजेन आवेदितः भरद्वाजावेदितः इति तृतीयातत्पुरुषसमासः।

२. चित्रकूटयायिनि- चित्रकूटं याति इति चित्रकूटयायि, तस्मिन् चित्रकूटयायिनि।

३. वनस्पतिः– वनस्य पतिः, पास्करादित्वात् सुट्।

छन्दः -

१. अलसललितेत्यस्मिन् श्लोके मालिनीछन्दः। तल्लक्षणं तावत् - "ननमयययुतेयं मालिनी भोगिलोकैः" इति।

अलङ्कारविमर्शः -

१. अलसललितेत्यस्मिन् श्लोके आदौ अध्वखेदः, ततः ललितत्वसौकुमार्यभावः, ततः दर्शनाद् अशिथिलालिङ्गनबाहुल्यम्, ततः तत्संवाहनता, ततः दौर्बल्यम्, ततः रामवक्षसि लग्नता, ततो निद्रावाप्तिरिति परं परं प्रति पूर्वपूर्वस्य हेतुतया कारणमालालङ्कारः। तल्लक्षणं दर्पणे -

"परं परं प्रति यदा पूर्वपूर्वस्य हेतुता।

तदा कारणमाला स्यात्" इति।

पाठगतप्रश्नाः - २

६. भरद्वाजावेदितस्य वनस्पतेः किं नाम।

७. वटवृक्षः कस्याः नद्याः तीरे वर्तते।

८. सीताया अङ्गानि कथम् आलस्ययुक्तानि।

९. सीता कुत्र कथं शेते।

१५.४) साम्प्रतं मूलपाठम् अवगच्छाम - २२

लक्ष्मणः - **एष विन्ध्याटवीमुखे विराधसंवादः।**

सीता - **अलंदाव एदिणा। पेक्खम्मि दाव अज्जउत्तसहत्तधरिदतालबुन्तादवत्त-निवारिदादपं दक्खिणारण्णप्पवेशारम्भम्। (अलं तावदेतेन। पश्यामि तावदार्यपुत्रस्वहस्तधृततालवृन्तातपत्रनिवारितातपमात्मनो दक्षिणारण्यप्रवेशारम्भम्।)**

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथेयपरमा यमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥२५॥

अन्वयः -

लक्ष्मणः - एष विन्ध्याटवीमुखे विराधसंवादः।

सीता - अलं तावद् एतेन। पश्यामि तावद् आर्यपुत्रस्वहस्तधृतताल-वृन्तातपत्रनिवारितातपम् आत्मनो दक्षिणारण्यप्रवेशारम्भम्।

गिरिनिर्झरिणीतटेषु वैखानसाश्रिततरूणि एतानि तानि तपोवनानि (सन्ति) येषु आतिथेयपरमाः नीवारमुष्टिपचना यमिनो गृहिणः गृहाणि भजन्ते॥२५॥

अन्वयार्थः -

लक्ष्मणः - एषः अयं विन्ध्याटवीमुखे विन्ध्यारण्यस्य प्रारम्भे विराधसंवादः विराधराक्षसस्य वृत्तान्तः।

सीता - अलं पर्याप्तं तावत् एतेन अनेन। तावत् आर्यपुत्रस्वहस्तधृततालवृन्तातपत्रनिवारितातपम् आर्यपुत्रेण स्वामिना श्रीरामेण स्वहस्तेन निजकरेण धृतं गृहीतं तालवृन्तं तालपत्ररूपम् आतपत्रं छत्रं तेन निवारितः आतपः निदाघः यस्मिन् तम् आत्मनः स्वस्य दक्षिणारण्यप्रवेशारम्भम् दक्षिणारण्ये प्रवेशस्य आरम्भं पश्यामि अवलोकयामि।

गिरिनिर्झरिणीतटेषु पर्वतनदीतीरेषु वैखानसाश्रिततरूणि वानप्रस्थाश्रमसेवितानि एतानि पुरोदृश्यमानानि तानि प्रसिद्धानि तपोवनानि सन्ति। येषु तपोवनेषु आतिथेयपरमाः अतिथिसत्कारप्रधानाः नीवारमुष्टिपचना मुष्टिपरिमितान्नपाचकाः यमिनः संयमिनः मुनयः गृहिणः गृहस्थाः सपत्नीकाः गृहाणि वासस्थाननि भजन्ते सेवन्ते॥२५॥

व्याख्यानम् -

लक्ष्मणः तौ विराधराक्षससंवादं दर्शितवान्। विन्ध्यारण्यप्रवेशमुखे विराधनामकः राक्षसः रामं लक्ष्मणं च भक्षितुं प्रयत्नं कृतवान्। किन्तु तदा रामः तं राक्षसं निहतवान्। अस्य वृत्तान्तस्य अनिष्टत्वात्

सीता तत् चित्रं द्रष्टुम् अनिच्छां प्रदर्शितवती। अतः सा दक्षिणारण्यप्रवेशं पश्यति यत्र श्रीरामः तालवृन्तम् आतपत्रं कृत्वा आतपं निवारयितुं चेष्टमानः वर्तते।

अस्मिन् चित्रे रामसीतालक्ष्मणाः विन्ध्यारण्यं प्रविष्टाः। चित्रम् अवलोक्य श्रीरामः मुग्धः सन् विन्ध्यारण्यं वर्णयितुं प्रवृत्तः। विन्ध्यपर्वते अरण्यम् इदं वर्तते। अतः अरण्यस्य पार्श्वे एव पार्वत्यनद्यः सच्छन्दं प्रवहन्ति। इदम् अरण्यं न मनुष्यहीनम्। यतो हि अस्य वृक्षाणाम् अधः वार्धक्यकाले वानप्रस्थाश्रमम् आश्रयन्तः जनाः निवसन्ति। अस्मिन् च वने बहवः मुनयः सपरिवाराः तिष्ठन्ति। ते मुनयः मुष्टिपरिमितं नीवारधान्यं भुक्त्वा एव जीवनधारणं कुर्वन्ति। अपि च वनं प्रति आगतानां सर्वेषां जनानां अतिथिज्ञानेन सम्यक् सत्कारादिकं करोति। एवं ते अतिथिदेवो भव इति उपनिषद्वाक्यं सम्यक् पालयन्ति इति वक्तुम् इच्छति रामः। एतादृशानां पुण्यवतां मुनीनां तपः कुर्वतां वानप्रस्थिनां च सम्बन्धात् विन्ध्यारण्यमिदं तपोवनं सञ्जातम्। अतः तत्र गत्वा ते धन्याः एव अभवन् इति रामस्य आकूतम्।

व्याकरणविमर्शः -

१. निर्झरिणी- निर्झरशब्दात् इनिप्रत्यये ङीपि च निर्झरिणी इति रूपम्।

२. वैखानसाश्रिततरूणि- वैखानसैः आश्रिताः तरवः येषु तथोक्तानि इति बहुव्रीहिसमासः।

छन्दः -

१. एतानि तानि इत्यस्मिन् श्लोके वसन्ततिलकं छन्दः।

पाठगतप्रश्नाः - ३

१०. विन्ध्याटवीमुखे कः संवादः अभवत्।

११. विन्ध्यारण्ये वृक्षाः कथम् आसन्।

१२. मुनयः किं खादन्ति स्म।

१५.५) साम्प्रतं मूलपाठम् अवगच्छाम - २३

लक्ष्मणः - अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्ध-गोदावरीमुखरकन्दरः सन्ततमभिष्यन्दमानमेघमेदुरितनीलिमाजनस्थानमध्यगो गिरिः प्रस्रवणो नाम।

स्मरसि सुतनु तस्मिन्पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि।
स्मरसि सरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि।। २६।।

किं च,

किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्।। २७।।

अन्वयः -

लक्ष्मणः - अयम् अविरलानोकहनिवहनिरन्तरस्निग्धनील-परिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः सन्ततम् अभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो प्रस्रवणो नाम गिरिः।

सुतनु तस्मिन् पर्वते लक्ष्मणेन प्रतिविहितसपर्यासुस्थयोः (आवयोः) तानि अहानि स्मरसि (अथवा) तत्र सरसनीरां गोदावरीं स्मरसि (तथा च) तदुपान्तेषु आवयोः वर्तनानि च स्मरसि।।२६।।

किं च, आसत्तियोगात् किमपि किमपि मन्दम् अविरलितकपोलम् अक्रमेण जल्पतोः, अशिथिलपरिरम्भव्यापृतैकदोष्णोः अविदितगतयामा रात्रिः एव व्यरंसीत्।।२७।।

अन्वयार्थः -

लक्ष्मणः - अयम् एषः अविरलानोकहनिवहनिरन्तरस्निग्ध-नीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः अविरलाः निबिडाः ये अनोकहाः वृक्षाः तेषां निवहाः समूहाः तैः निरन्तराः घनीभूताः स्निग्धाः चिक्कणाः नीलाः श्यामलाश्च परिसराः प्रान्तभागाः यस्य, तेन अरण्येन वनेन परिणद्धा परिवेष्टिता या गोदावरी नदी, तया मुखराणि गोदावरीकलपूरितानि कन्दराणि गुहाः यस्य तादृशः, सन्ततम् अनवरतम् अभिष्यन्दमानमेघदुरितनीलिमा अभिष्यन्दमानैः स्वयं वर्षद्भिः मेघैः जलधरैः दुरितः स्निग्धीकृतः नीलिमा श्यामलत्वं यस्य तादृशः जनस्थानमध्यगः जनस्थाननामकस्य अरण्यस्य मध्यगः मध्ये स्थितः प्रस्रवणो नाम प्रस्रवणनामकः गिरिः पर्वतः।

हे सुतनु! सुन्दरि ! तस्मिन् पर्वते प्रस्रवणाख्ये अद्रौ लक्ष्मणेन सौमित्रिणा प्रतिविहितसपर्यासुस्थयोः प्रतिविहितया कृतया सेवया सुस्थयोः आवयोः तानि सुखमनुभूतानि अहानि दिनानि स्मरसि अथवा तत्र तस्मिन् स्थाने सरसनीरां सरसजलां गोदावरीं तन्नामिकां नदीं स्मरसि तथा तदुपान्तेषु गोदावरीप्रान्तेषु आवयोः सीतारामयोः वर्तनानि निवास–क्रीडा–भ्रमरादीनि च स्मरसि।।२६।।

किं च, आसत्तियोगात् किमपि किमपि मन्दम् अविरलितकपोलम् अक्रमेण जल्पतोः, अशिथिलपरिरम्भव्यापृतैकदोष्णोः अविदितगतयामा रात्रिः एव व्यरंसीत्

आसत्तियोगात् अनुरागात् अतिसान्निध्यात् किमपि किमपि मन्दं शनैः शनैः अविरलितकपोलं परस्परसंमिलितगण्डम् अन्यैरश्राव्यम् अक्रमेण क्रमरहितेन जल्पतोः वदतोः अशिथिलपरिरम्भव्यापृतैकैकदोष्णोः एकैकभुजेन सुदृढतया समालिङ्गने व्यस्तहस्तयोः आवयोः अविदितगतयामा अज्ञातेन गतप्रहरा रात्रिरेव रजन्येव व्यरंसीत् विरता।। परन्तु आवयोः परस्परजल्पनं न विरतमिति सूचितं भवति।।२७।।

व्याख्यानम् -

लक्ष्मणः चित्रे जनस्थाननामके अरण्ये स्थितं प्रस्रवणनामकं पर्वतं दृष्ट्वा तस्य प्राकृतिकसौन्दर्यं वर्णयति। अयं पर्वतः घनारण्येन परिपूरितः। अस्मिन् पर्वते गोदावरी नदी प्रवहति स्म। तस्याः तटप्रदेशः श्यामलवनराजिना शोभमानः आसीत्। पर्वतस्य कन्दराणि अपि नद्याः कलकलरवेण मुखरितानि आसन्। मेघाः सततं वर्षन्तः पर्वतं तदुपरि विद्यमानं पादपसमूहं च स्निग्धीकरोति स्म।

अत्र रामः चित्रम् अवलोक्य प्रस्रवणपर्वते तेषां जीवनं कथम् आसीत् इति स्मरति। यदा तौ तस्मिन् पर्वते आस्तां तदा भ्राता लक्ष्मणः निरन्तरं तयोः सेवां कृतवान्। निवासे तयोः कोऽपि क्लेशः न अभवत्। तौ सुखेन तत्र दिनानि यापितवन्तौ। तस्मिन् पर्वते सलिलपूर्णा सरित् गोदावरी प्रवहति। रामः सीता च प्रायः एव तस्याः नद्याः तीरे भ्रमितवन्तौ कदापि तत्र उपविश्य वार्तालापं कृतवन्तौ। चित्रे तं पर्वतम् अवलोक्य रामः इदं सर्वं स्मरति। किञ्च सीता तत् सर्वं स्मरति न वा इति तां पृच्छति। एवं कथोपकथनेन तेषां चित्रदर्शनं प्रवर्तते।

एवं कदाचित् तौ गोदानद्याः तीरे आगत्य वार्तालापं कर्तुम् आरभेताम्। वार्तालापकाले तिष्ठतोः तयोः रात्रिकालः शीघ्रमेव निर्गतः। अर्थात् तौ परस्परं वार्तालापे तथा मग्नौ आसन् यत् तयोः समयज्ञानं नासीत्। एवम्प्रकारेण वनवासकाले तेषां दिनानि अतिवाहितानि इति वर्णयति सीतापतिः श्रीरामः।

व्याकरणविमर्शः -

१. परिणद्धः- परिपूर्वकात् नह्धातोः क्तप्रत्यये परिणद्धः इति रूपम्।

२. मुखरः- मुखशब्दात् रप्रत्यये मुखरः इति रूपम्, स्वमुखकुञ्जेभ्यो वक्तव्यम् इति वार्तिकेन रप्रत्ययः।

३. अभिष्यन्दमानः- अभिपूर्वकात् स्यन्द्धातोः शानच्प्रत्यये अभिष्यन्दमानः इति रूपम्।

४. नीलिमा- नीलस्य भावः, नीलशब्दात् इमनिच्प्रत्यये नीलिमा इति रूपम्।

५. प्रतिविहितसपर्यासुस्थयोः - प्रतिविहितसपर्यया सुस्थयोः प्रतिविहितसपर्यासुस्थयोः इति तृतीयातत्पुरुषः।

६. आसत्तियोगात् - आङ्पूर्वकात् सद्-धातोः क्तिन्प्रत्यये विभक्त्यादिकार्ये आसत्तिः इति रूपम्। आसत्तेः योगः आसक्तियोगः, तस्मात् आसक्तियोगात् इति षष्ठीतत्पुरुषः।

७. व्यरंसीत् - विपूर्वकात् रम्-धातोः लुङ्लकारे प्रथमपुरुषैकवचने व्यरंसीत् इति रूपम्।

छन्दः-

१. स्मरसि सुतनु इति श्लोके मालिनीछन्दः।

२. किमपि किमपि इति श्लोके मालिनीछन्दः।

अलङ्कारविमर्शः -

१. स्मरसि सुतनु इति श्लोके एकस्य त्वमिति कर्तुः स्मरसि इति क्रियात्रयेण सम्बन्धाद् दीपकालङ्कारः। तल्लक्षणं दर्पणे -

"अथ कारकमेकं स्यादनेकासु क्रियासु चेत्" इति।

पाठगतप्रश्नाः - ४

१३. प्रस्रवणो नाम गिरिः कुत्र आसीत्।

१४. तौ कस्याः नद्याः तीरे भ्रमितवन्तौ।

१५. रात्रिः कथं व्यरंसीत्।

१६. तौ कथं जल्पन्तौ आस्ताम्।

१७. व्यरंसीत् इति कस्य धातोः कस्मिन् लकारे भवति।

१५.६) साम्प्रतं मूलपाठम् अवगच्छाम - २४

लक्ष्मणः - **एषा पञ्चवट्यां शूर्पणखा।**

सीता - **हा अज्जउत्त, एत्तिअं दे दंसणं। (हा आर्यपुत्र, एतावत् ते दर्शनम्।)**

रामः - **अयि विप्रयोगत्रस्ते, चित्रमेतत्।**

सीता- **जहा तहा होदु। दुज्जणो असुहं उप्पदेइ। (यथा तथा भवतु। दुर्जनः असुखमुत्पादयति।)**

रामः - **हन्त, वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।**

लक्ष्मणः - **अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना**
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।२८।।

अन्वयः -

लक्ष्मणः - एषा पञ्चवट्यां शूर्पणखा।

सीता - हा आर्यपुत्र, एतावत् ते दर्शनम्।

रामः - अयि विप्रयोगत्रस्ते, एतत् चित्रम्।

सीता- यथा तथा भवतु। दुर्जनः असुखमुत्पादयति।

रामः - हन्त, वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्मणः -अथ पापैः रक्षोभिः कनकहरिणच्छद्मविधिना इदं तथा वृत्तं यथा क्षालितम् अपि व्यथयति। शून्ये जनस्थाने विकलकरणैः आर्यचरितैः ग्रावा अपि रोदिति वज्रस्य (अपि) दलति हृदयम्।। २८।।

अन्वयार्थः -

लक्ष्मणः - एषा चित्रालिखिता पञ्चवट्यां शूर्पणखा तन्नामिका राक्षसी रावणभगिनी।

सीता - हा आर्यपुत्र, एतावत् एतावत्पर्यन्तं ते तव दर्शनम् ईक्षणम्।

रामः - अयि विप्रयोगत्रस्ते वियोगभीते, एतत् चित्रम्।

सीता- यथा तथा भवतु कथमपि भवतु। दुर्जनः खलः असुखं दुःखम् उत्पादयति।

रामः - हन्त, वर्तमान इव प्रत्यक्षीभूत इव मे मम जनस्थानवृत्तान्तः जनस्थानस्य वृत्तान्तः प्रतिभाति।

लक्ष्मणः - अथ शूर्पणखावृत्तान्ताद् अनन्तरं पापैः पापाचारैः रक्षोभिः राक्षसैः कनकहरिणच्छद्मविधिना स्वर्णमृगव्याजकरणेन इदं चित्रनिर्दिष्टं सीताहरणं तथा तादृशं वृत्तं निष्पन्नं यथा यादृशं क्षालितम् प्रतिकृतम् अपि व्यथयति दुःखं जनयति। शून्ये निर्जने जनस्थाने दण्डकारण्ये विकलकरणैः स्वस्वव्यापारशून्यानि इन्द्रियाणि येषु तादृशैः आर्यचरितैः आर्यस्य रामस्य मूर्च्छाप्रभृतिव्यापारैः ग्रावा अपि शिला अपि रोदिति रोदनं करोति वज्रस्य कुलिशस्य (अपि) दलति विदारयति हृदयं मध्यप्रदेशम्।।२८।।

व्याख्यानम् -

लक्ष्मणः चित्रे पञ्चवट्यां शूर्पणखां दर्शयति। तदा सीता अशुभं द्रष्टुम् अनिच्छन्ती रामं कथयति एतावत्पर्यन्तमेव चित्रदर्शनम् अस्तु इति। तदा रामः सीतां कथयति चित्रमेतद् वास्तविकः वियोगः नास्ति, चिन्ता मास्तु इति। तदा सीता कथयति यथा कथञ्चिद् दुर्जनः दुःखकारणं भवति। ततः लक्ष्मणः चित्रं दृष्ट्वा वर्णयति यदा स्वमृगव्याजेन सीताहरणं रावणेन कृतं तदा रामस्य व्यापारं दृष्ट्वा ग्रावा अपि रोदितवती। किञ्च तस्य क्रन्दनादिकं श्रुत्वा वज्रस्य कठोरस्यापि हृदयं भिन्नम्।

व्याकरणविमर्शः -

१. पञ्चवटी – पञ्चानां वटानां समाहारः इति विग्रहे निष्पन्नस्य द्विगुसंज्ञकस्य पञ्चवटशब्दस्य अकारान्तत्वाद् "अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः" इति वार्तिकेन स्त्रीलिङ्गे ततः ङीप्।

छन्दः -

१. अथेदमिति श्लोके शिखरिणीछन्दः। तस्य लक्षणं तावत्– "रसै रुद्रैश्छिन्ना यमनभसलाः गः शिखरिणी" इति।

पाठगतप्रश्नाः - ५

१८. दुर्जनः किमुत्पादयति।

१९. सीतापहरणं कथं राक्षसेन कृतम्।

२०. रामचरितैः किं किं भवति।

पाठसारः

इतः परं सीता शृङ्गवेरपुरे रामलक्ष्मणयोः जटाबन्धनस्य चित्रं दर्शयति। ततः लक्ष्मणः रामं प्रशंसन् कथयति - इक्ष्वाकुवंशीयाः राजानः वार्धक्यकाले सम्पत्त्यादिकं पुत्रेभ्यः समर्प्य यद् वानप्रस्थव्रतम् आचरति तत् श्रीरामः बाल्यकाले एव आचरत्। तदनन्तरं सीता चित्रे पुण्यसलिलां भागीरथीं पश्यति। रामः कथयति यत् बहुकालात् पूर्वं सगरनामकः एकः नृपः अश्वमेधनामकं यज्ञम् अकरोत्। तस्य अश्वमेधयज्ञस्य अश्वम् इन्द्रः कपटेन उपायेन चोरयित्वा गुप्तस्थाने अस्थापयत्। अश्वं विना यज्ञसमाप्तिः न भविष्यति। अतः सगरस्य षष्टिसहस्रं पुत्राः अश्वम् अनुसन्दधानाः पृथिवीं भिन्दन्तः महर्षेः कपिलस्य कोपात् भस्मीभूताः। भागीरथीजलस्पर्शेन एव ते पुनः उद्धारं प्राप्स्यन्तीति ज्ञात्वा बहुकालात् परं सगरस्य प्रपौत्रः भगीरथः कठोरतपसा भागीरथीं भूलोकम् आनीय तस्याः जलेन तेषाम् उद्धारं विहितवान्। इयं एव भागीरथी रघुवंशस्य देवता वर्तते। अतः रामः ताम् उद्दिश्य प्रणामं निवेदयति।

ततः लक्ष्मणः चित्रे यमुनानद्याः तटे अवस्थितं श्यामनामकं वटवृक्षम् दर्शयति यं वृक्षं ते चित्रकूटवनगमनमार्गे प्राप्तवन्तः। रामः तस्य वृक्षस्य अधः घटितं वृत्तान्तं वर्णयति। मार्गपरिश्रमेण श्रान्ता सीता रामस्य उरसि रामेण दृढालिङ्गिता सती शयनं कृतवती।

ततः लक्ष्मणः विराधराक्षसवृत्तान्तं दर्शयति। किन्तु सीता तत् चित्रम् अदृष्ट्वा दक्षिणारण्ये तेषां प्रवेशात्मकं चित्रम् द्रष्टुम् आरभते यत्र श्रीरामः तेषां निदाघं दूरीकर्तुं तालवृन्तम् एव आतपत्रीकृतवान्। ततः रामः विन्ध्यारण्यं वर्णयति। तस्मिन् तपोवने वृक्षाणाम् अधः वानप्रस्थाश्रमिणः गृहेषु च मुष्टिपरिमितम् अन्नं भुञ्जानाः अतिथिसत्कारपरायणाः मुनयः पत्न्या सह निवसन्ति स्म।

ततः लक्ष्मणः प्रस्रवणनामकं पर्वतम् दर्शयति यः पर्वतः जनस्थाननामके अरण्ये आसीत्। अयं पर्वतः घनारण्येन परिपूरितः आसीत्। अस्मिन् पर्वते गोदावरी नदी प्रवहति स्म। तस्याः तटप्रदेशः श्यामलवनराजिना शोभमानः आसीत्। पर्वतस्य कन्दराणि अपि नद्याः कलकलरवेण मुखरितानि आसन्। मेघाः सततं वर्षन्तः पर्वतं तदुपरि विद्यमानं पादपसमूहं च स्निग्धीकुर्वन्ति स्म। ततः रामः गोदावरीनदीं तस्याः तटे तयोः भ्रमणं लक्ष्मणेन विहितां तयोः सेवां च स्मरति। कथं तौ वार्तालापरतौ गोदातीरे सम्पूर्णाम् अपि रात्रिं यापितवन्तौ इति अपि स्मरति। एवम् एष गोदावरीवृत्तान्तः समाप्यते।

ततः पञ्चवट्यां शूर्पणखावृत्तान्तं लक्ष्मणः पश्यति। परन्तु तत्र सीताया आग्रहो नास्ति। यतो हि चित्रं दृष्ट्वा अपि सीता खिन्ना भवति। दुर्जनः कथञ्चिद् दुःखम् उत्पादयति एव। ततः सीताहरणात्परं रामस्य क्रन्दनादिव्यापारैः ग्रावा अपि रोदिति वज्रस्य हृदयं च भवति विदीर्णम्। एवं समासतः पाठसारः प्रस्तुतः।

पाठान्तप्रश्नाः

१. गङ्गानयनवृत्तान्तं सविस्तारं वर्णयत।
२. अलसलुलित इत्यादिश्लोकं यथामति वर्णयत।
३. तेषां दक्षिणारण्यप्रवेशः कथम् आसीत्।
४. प्रस्रवणगिरेः यथाग्रन्थं वर्णनं प्रदीयताम्।
५. मुनयः विन्ध्यारण्ये कथं जीवनं यापयन्ति स्म।
६. रामः सीता च गोदावरीतीरे कथं रात्रियापनं कृतवन्तौ।
७. किमपि किमपि इति श्लोकं व्याख्यात।
८. अथेदं रक्षोभिरिति श्लोकं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. रामलक्ष्मणयोः जटाबन्धनं शृङ्गवेरपुरे सञ्जातम्।
२. इक्ष्वाकुवंशीयाः वार्धक्यकाले वानप्रस्थाश्रमं पालयन्ति।
३. भागीरथी प्रसन्नपुण्यसलिला भगवती वर्तते।
४. भगीरथः भागीरथीं स्वर्गतः मर्त्यलोकम् आनीतवान्।
५. सा सीतायां अरुन्धती इव शिवानुध्याना भवेदिति रामस्य प्रार्थना।
६. भरद्वाजावेदितस्य वनस्पतेः श्याम इति नाम।
७. वटवृक्षः कालिन्दीनद्याः तीरे वर्तते।
८. सीताया अङ्गानि कथम् मार्गगमनपरिश्रमाद् आलस्ययुक्तानि।
९. सीता स्वस्य अवयवान् रामस्य वक्षसि कृत्वा शेते।
१०. विन्ध्याटवीमुखे विराधसंवादः अभवत्।
११. विन्ध्यारण्ये वृक्षाः वैखानसाश्रिताः आसन्।
१२. मुनयः मुष्टिपरिमितं नीवारधान्यं खादन्ति स्म।
१३. प्रस्रवणो नाम गिरिः जनस्थाननामके अरण्ये आसीत्।

१४. तौ कस्याः गोदावरीनद्याः तीरे भ्रमितवन्तौ।

१५. जल्पतोः सीतारामयोः रात्रिः अविदितगतयामा व्यरंसीत्।

१६. तौ अक्रमेण जल्पन्तौ आस्ताम्।

१७. विपूर्वकात् रम्-धातोः लुङ्लकारे प्रथमपुरुषैकवचने व्यरंसीत् इति रूपम्।

१८. दुर्जनः असुखमुत्पादयति।

१९. सीतापहरणं स्वर्णमृगच्छलेन राक्षसेन कृतम्।

२०. रामचरितैः ग्रावा अपि रोदिति वज्रस्य हृदयं च भिन्नं भवति।

॥ इति पञ्चदशः पाठः ॥

कादम्बर्यां शुकनासोपदेशः

भूमिका

कविकर्म भवति काव्यम्। तच्च काव्यं जनानां श्रोत्रेषु सुधाधारां प्रवाहयति, वर्णनीयेन सह ऐकात्म्यम् अनुभवतां सहृदयानां मनसि कमपि आनन्दोल्लासं जनयति। काव्यं कान्तासम्मितोपदेशप्रदानेन सर्वेषां जनानां मनस आह्लादकं भवति। तत् काव्यं ध्वनिकाव्यं गुणीभूतकाव्यं चेति द्विविधं भवति। तच्च पुनः दृश्यश्रव्यभेदेन द्विविधं भवति। तत्र दृश्यं नाम दर्शनयोग्यं नाटकादिकं श्रव्यं च महाकाव्यादिकम्। श्रव्यकाव्यं पुनः गद्यपद्यभेदेन द्विविधम्। तत्र छन्दोबद्धमयं पद्यम्, वृत्तबन्धोज्झितं च गद्यम्।

पद्यकाव्यस्यैव उद्भवः इति केषाञ्चिद् विदुषां मतम्। गद्यकाव्यस्य परमुत्पत्तिः भवतु किन्तु गद्यकाव्यसंरचने दार्ढ्यम् अत्यावश्यकम्। तस्मात् प्रसिद्धा इयं - "गद्यं कवीनां निकषं वदन्ति" इति। गद्यकाव्यस्यापि आख्यायिका कथा इति भेदद्वयम्। तयोः लक्षणं तावत् - "कथा कल्पितवृत्तान्ता सत्यमाख्यायिका स्मृता" इति।

गद्यकाव्यनिर्माणपरम्परायां बाणभट्ट एव प्रधानाचार्य इत्यत्र नास्ति संशयः। तद्विरचितं कादम्बरी इति गद्यकाव्यं गद्यकाव्येषु महत् स्थानं बिभर्ति। कवेः वर्णनसौन्दर्यम् अनुपमम् अत्र। अत्र सर्वत्रैव अलङ्काराणां मधुरझङ्काराः सहृदयानां मनसि परमोल्लासं जनयन्ति हृदयं च विकासयन्ति। कादम्बरी नाम मदिरा। रससमास्वादकानां सहृदयानां आनन्दोल्लासविधायिनी सुमधुरा कादम्बरी मदिरा एव। अतः सार्थकम् अस्य ग्रन्थस्य अभिधानम्। अत एव बाणभट्टपुत्रस्य पुलिनभट्टस्योक्तिः- "कादम्बरीरसभरेण समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम्" इति। एतस्य ग्रन्थस्य पूर्वभागं निर्माय कविः बाणभट्टः दिवं गतः। तदा तत्पुत्रः पुलिनभट्टः एतस्य उत्तरभागं रचयामास।

कादम्बरी इत्याख्यं गद्यकाव्यं कथा आख्यायिका वा इति विषये विदग्धानां वैमत्यम् अस्ति। तन्मध्ये बहूनां विदुषां मतानुसारेण काव्यमिदं कथा इति।

कादम्बर्याः कथाभागस्य एकः अंशः शुकनासोपदेशः अत्र प्रतिपाद्यमानविषयः। शुकनासोपदेशः इति भागात्पूर्वं काव्यस्यास्य कथाप्रवाहः संक्षेपेण तावद् एवम् - विदिशानगर्याः राज्ञे शूद्रकाय एका चण्डालकन्या विशिष्टम् एकं शुकपक्षिणम् आनीय अयच्छत्। तस्य पक्षिणः वाक्कौशलेन विस्मितः राजा तस्मै पक्षिणे तस्य परिचयादिकम् अपृच्छत्। सः पक्षी अपि राज्ञे तस्य सर्वं जन्मादिवृत्तान्तम् अकथयत्। ततः स राज्ञे निवेदितवान् यत् कस्यचित् व्याधस्य आक्रमेण तस्य पिता हतः स च आहतः सन् भूमौ पतितः। तदनन्तरं महर्षेः जवालस्य पुत्रेण सः दृष्टः स्वाश्रमम् आनीय सेवितश्च। ततः महर्षिजावालिः तं विहगं दृष्ट्वा 'एष स्वदुष्कर्मणः फलभोगं करोति' इत्युक्तवान्। तदा तत्र उपस्थिता मुनिबालकाः समुत्सुकाः सन्तः महर्षिजाबालिं पक्षिणः विषये पृष्टवन्तः। तदा मुनिजावालिः पक्षिणः जन्मादिवृत्तान्तं वक्तुमारभत यत् - अवन्तीनगर्याम् उज्जयिनीनामकः एकः प्रदेशः आसीत्। तत्र विद्यमानस्य राज्ञः तारापीडस्य विलासवतीनामिका भार्या शुकनासनामकः अमात्यश्चासीत्। शुकनासस्य भार्याया मनोरमायाः किन्च राज्याः विलासवत्याश्च सन्तानः नासीत्। सन्तानलाभाय राज्ञी विलासवती मनोरमा च व्रतम् आचरितवत्यौ। ततः राज्याः विलासवत्याः शुकनासपत्न्याः मनोरमायाश्च पुत्रौ संवृत्तौ। राज्याः पुत्रस्य नाम चन्द्रापीड इति मनोरमायाः च वैशम्पायन इति। ततः अध्ययनाय चन्द्रापीडः मित्रेण वैशम्पायनेन सह गुरुगृहं गतः। तत्र स शस्त्रविद्यां शास्त्रविद्यां च अलभत। अध्ययनाद् अनन्तरं गुरुगृहाद् आगतस्य राजकुमारस्य चन्द्रापीडस्य यौवराज्याभिषेकसमयः आगतः। तदा अमात्यः शुकनासः कथं राजकार्यादिकं परिचालनीयम् इत्यस्मिन् विषये सारगर्भम् उपदेशं दत्तवान्। स एव उपदेशः कादम्बर्याः शुकनासोपदेशः इति नाम्ना प्रसिद्धः। स हि शुकनासोपदेशः 'एवं समतिक्रामत्सु' इत्यतः आरभ्य 'इत्येतावदभिधायोपशशाम' इति पर्यन्तम्।